सकृदपि परिगीतं हेलया श्रद्धया वा
भृगुवरनरमात्रं तारयेत् कृष्णनाम।।

विशेषजिज्ञासायां श्रीनीलकण्ठसुरिकृतं श्रीमन्त्रभागवतं द्रष्टव्यम्। यत्र सार्द्धशतद्वय ऋङ्मन्त्राणां श्रीकृष्णलीलापरं व्याख्यानं दृश्यते।

उपक्रमणिकायां–यस्मिन् उपक्रमणिकायां गोकुलकाण्ड-वृन्दावनकाण्ड-अक्रूरकाण्ड-मथुराकाण्ड इति काण्डचतुष्टयं वर्त्तते।

सत्यं ज्ञानमनन्तं यत्तद्विष्णोः परमं पदम्।
प्राप्तुं मन्त्रेषु गोपाल विष्णोः कर्माणि पश्यतः।।

उपसंहारे–

सार्द्धं शतद्वयमृचां रामकृष्णकथानुगम्।
दर्शितं भगवांस्तेन तुष्यतां सात्वतां पतिः।। इति
यन्मया लपितं मौढ्यात क्षुद्रेण मन्दमेधसा।
क्षम्यतां राधिकाप्रिय वेदमूर्तिः स्वयं प्रभो।।३४

३५। **शुक्लयजुर्वेदः।**

मङ्गलाचरणम्

शं नो मित्रः शं वरुणः शं नो भवत्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रः।।

(३६।९)

अस्य व्याख्यानं अष्टादशानुच्छेदं द्रष्टव्यम्।

मङ्गलं गौरचन्द्राय नित्यानन्दाय मङ्गलम्।
श्रीअद्वैतगदाधरश्रीवासाय च मङ्गलम्।।
लेखयति यथैव मां गौरकृष्णमहाप्रभुः।
विलिखानि तथाहं तु नास्ति स्वतन्त्रता मम।।३५

३६। **मूलम्** (१)

श्रीश्रीपुरषसूक्तम्

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतः स्पृत्वा अत्यतिष्ठद्दशाङ्गुलम्।।

आनन्दिनी

रूपदेवानुसारेण श्रीउव्वटमहीधरौ।
सूक्तं पुरुषदेस्य सायनाचार्य्यसम्मतम्।।
आनन्दिनी कृता टीका राधाकुण्डनिवासिना।
श्रीमद्वेदान्ततीर्थेन गुरुकृपालवार्थिना।।

अत्र पुरुषः इति विशेष्यपदम्। पुरुषः इति अत्र श्रीयास्कः (२।१।४)-पुरुषः पुरिषादः पुः शरीरं मानवदेहं, सर्वप्राणीशरीरं वा, बुद्धिर्वा मानवदेहधारिणां बुद्धिर्वा पुः शब्देनोच्यते। तयोरसौ आत्मा विषयोपलब्ध्यर्थं रूपादिविषयभोगनिमित्तं सीदतीति प्राप्नोतीति पुरिसीदनात् पुरिषादः। स एवाति परोक्षवर्तितामापादितः पुरुषः।

यद्वा-पुरिशयः। तयोरसौ बुद्धिशरीरयोः शेते शयनं करोतीति पुरिशयः सन् पुरुषः इत्युच्यते।

"**पुरयतेर्वा।**"

पूर्णमनेन पुरुषेण सर्वगतत्वात् सर्वव्यापकत्वाज्जगदिदं परिव्याप्तत्वात् पुरुषः। इति

" **पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य।**"

अन्तरित्येवमन्तरपुरुषस्य ब्रह्मणोऽभिप्रायेण प्रासङ्गिकमुच्यते। तेनेदं पूर्णं पुरुषेण सर्वम् (श्वे. ३।९) इत्यपि निगमो भवेति इति श्रीयास्काचार्यः। पुरः कुषम् **पॄ** धातुः। इति

अथ श्रीपुरुषसूक्तस्य श्रीनारायण ऋषिः पुरुषो देवता अनुष्टुप् छन्दः अन्त्या त्रिष्टुप्, मोक्षे विनियोगः। स पुरुषः श्रीकृष्णाख्य परब्रह्म।

अत्र श्रीभागवते (१।७।४)-

अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयाम्।

श्रीतत्वसन्दर्भे (२०)-पुरुषः पूर्णपदस्य मुक्तप्रग्रहया वृत्या-

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
वर्तते निरुपाधिश्च वासुदेवेऽखिलात्मनि।।

इति पाद्मोत्तरखण्डवचनावष्टम्भेन।

तथा श्रीमद्भागवते (२।३।९-१०)-

कामकामो यजेत्सोममकामः पुरुषं परम्।।
अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।।

इत्यस्य वाक्यद्वयस्य पूर्ववाक्ये "पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरम्" उत्तरवाक्ये "पुरुषं पूर्णं परं निरुपाधिम्" इति टीकानुसारेण च पूर्णः पुरुषोऽत्र स्वयं भगवानेवोच्यते इति।

तस्मात्पुरुषशब्देनात्र स्वयं भगवान् श्रीकृष्ण एव। अत्र श्रीकृष्ण एव साक्षात्पुरुषशब्द-प्रयुज्यते श्रीअर्जुनः। (भा. १।७।२३)–

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि।।
पुरुष इति शब्दस्तु रसब्रह्मचिदात्मनि।
व्रजेन्द्रनन्दने कृष्णे मुक्तप्रग्रहया भवेत्।।

(१) यद्वा–पुराणत्वात्पुरुषः, श्रीब्रह्मसंहितायाम् (५।४२)–

"**आद्यं पुराणपुरुषं नवयौवनञ्च।**" इति

(२) अथवा–पूर्णत्वात्पुरुषः, श्वे. ३।९–

'तेनेदं पूर्णं पुरुषेण सर्वम्'

(३) शरीररूपे पुरिशयनात् पुरुषः, **स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते।** (प्रश्न. ५।५) पुरिशयं सर्वात्मान्तर्यामिनं पुरुषं सर्वकर्तारं सर्वस्रष्टारं श्रीगोविन्ददेवमीक्षते इति।

(४) यद्वा–पुरुः शब्दो बहुपरः, तथाहि अमरकोषे (३।१।६३)–
पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च इति। **वन षण** सम्भक्तौ इति धातुः, बहुनां बहुभिर्वा साधकै-र्भजनात्पुरुषः।

षण दाने इति धातुः, स्वभक्तेभ्यो बहुदानात्पुरुषः। एवं गुणपूर्णः स्वयं भगवान् श्रीकृष्ण एव। नान्य इत्यर्थः। तथा च श्रीपाद्मे–

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधी च वर्त्तते वासुदेवे सनातने।।
सर्वलोकप्रतीत्या च पुरुषः प्रोच्यते हरिः।
तं विना पुण्डरीकाक्षं नान्यः पुरुषशब्दभाक्।।
ब्रह्माद्या देवताः सर्वा यक्षतुम्बुरुकिन्नराः।
ते सर्वे पुरुषांशत्वादुच्यते पुरुषा इति।।

श्रीनारसिंहे–

स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः।
प्रकृतिस्पर्शराहित्यात्स्वातन्त्र्यात् वैष्णवादपि।।

श्रीवैष्णवे–

स एव वासुदेवोऽर्थः सक्षात्पुरुष उच्यते।
स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरस्सरम्।।

तस्मात्पुरणत्व-पूर्णत्व-पुरिशयत्व-बहुभक्तसेवित्व-भक्तेभ्यो बहुदातृत्वादिरूपगुणगणाना-माश्रय-स्वयं भगवान् श्रीकृष्ण एव।

तथा च श्रीशुकदेवः (२।४।१२)-

नमः परस्मै पुरुषाय भूयसे
सदुद्भवस्थाननिरोधलीलया।
गृहीतशक्तित्रितयाय देहिना-
मन्तर्भवायानुपलक्ष्य वर्त्मने।। इति

अनन्तगुणपूर्णाय पुरिशयाय ते नमः।
भक्ताभीष्टप्रदानाय कृष्णाय पुरुषाय ते।।२६

३७। सहस्रशीर्षा-

मूलम्

नमः सहस्रशीर्षाय सहस्रनयनाय च।
सहस्रचरणाय च श्रीकृष्णाय सदा नुमः।।

अथ परमपुरुषस्य श्रीकृष्णस्य सहस्रशीर्षत्वादिस्वरूपं श्रीगीतोनिषद्वाक्यं प्रतिपादयति (११।१६)-

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वरविश्वरूप।।

अत्र अनेकबाहूदरवक्त्रनेत्रम् इत्यादिशब्देन पुरुषस्य अनेके बाहव उदराणि वदनानि नयनानि च प्रतिपादितानि भवन्ति। अत्र "**शिरसः शीर्षन् ये केशे तु वा**" (हरिना. व्या. ७।४६) इति।

एतेन पुरुषस्य सर्वगतत्वं सर्वदर्शितं सर्वाधारत्वं सर्वसुखप्रदत्वं सर्वरक्षकत्वं च सुव्यक्तं भवति।

स भूमिं सर्वतो वृत्त्वा अत्यतिष्ठद्दशाङ्गुलम्।।

सर्वतः इति शुक्लयजुः-साम-श्रीरूपपादानां पाठः। विश्वतः इति ऋग्वेदः सुदर्शनसुरीनां पाठः। वृत्वा इति साम-ऋक्-श्रीरूप-श्रीसुदर्शनाचार्याणां पाठः। स्पृत्वा इति यजुर्वेदीयः पाठः।

स सर्वाधारः सहस्रशीर्षत्वादिविशिष्टः पुरुषः श्रीकृष्णः सर्वतो वृत्वा ब्रह्माण्डं भुवनकोषं वा वृत्वा स्पृत्वा वा व्याप्य परिव्याप्य अतिशयेन अतिष्ठत्।

तथा च श्रीगीतायाम् (११।१०)-

द्यावा पृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः। इति

(१) अथवा–भूमिं जगत्कारणं प्रकृतिम्। सर्वतः महदादिकार्यसमूहैः सह दशाङ्गुलं दशाङ्गुलमात्र-विशिष्टम् भूत्वा पुरुषोऽत्यतिष्ठदधिष्ठितवान्।

ननु पुरुषस्य दशाङ्गुलत्वे परिच्छिन्नदोषप्रसङ्गः? इति चेन्न औणादिकत्वात्।

दशाङ्गुलम् इत्यत्र नतु अच्-प्रत्ययः। किन्तु अनन्तयोजन इत्यर्थे दशाङ्ग-शब्दात् औणादिक 'उलच्-प्रत्ययः'। अतोऽनन्तयोजनं ब्रह्माण्डमण्डलं परिव्याप्यातिष्ठतीत्यर्थः। पद्मपुराणे–

भूमेश्च ब्रह्मकोशस्याप्यन्तरालं कियत्? वद।
योजनानामनन्तत्वाद्दशाङ्गुलमिदं विदुः।।

अपरञ्च सात्त्वतसंहितायाम्–सहस्रशब्दोऽनन्तवचनः पुरुषशब्दो श्रीवासुदेवपरः। भूमिशब्देन भूरादिचतुर्दशभुवनमुच्यते। दशाङ्गुलशब्देन अनन्तयोजनवाचकः।

(२) अथवा–अङ्गुलशब्दो गुणपरः, दशगुणवस्त्वन्तरभूतानि अतीत्यतिष्ठत्। कानि तानि? तत्राह–भुवो दशोत्तरा आपः, आपो दशोत्तरो तेजः। तेजो दशोत्तरो वायुः। वायोर्दशोत्तर आकाशः, आकाशाद्दशोत्तरोऽहङ्कारः, अहङ्काराद्दशोत्तरो महान्, महतो दशोत्तरमव्यक्तम्। एवं स पुरुषः समस्तमिद-मतीत्या तिष्ठतीत्यर्थः।

(३) केचिद्दशाङ्गुलशब्देन हृदयप्रदेशं वदन्ति। स भूरादिलोकानभिव्याप्य हृदयाकाशमभिव्याप्य तिष्ठति। नाभेः सकाशाद्दशाङ्गुलमतिक्रम्य हृदि स्थितः। (उव्वटः)

(४) अथवा–दशाङ्गुलशब्देन दशेन्द्रियाणि, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि तानि व्याप्य तिष्ठतीत्यर्थः।

तथा च श्रीभागवते (४।९।६)–

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान् नमो भगवते पुरुषाय तूभ्यम्।।

तस्मादिन्द्रियाणामुद्बोधकत्वं दशाङ्गुलमिति अपरे वदन्ति। तमभिव्याप्य तिष्ठतीत्यर्थः।

एवमेव श्वेताश्वतरोपनिषद्भाष्ये श्रीशङ्कराचार्यः (३।१४)–दशाङ्गुलमनन्तमपारमित्यर्थः।

अथवा–नाभेरुपरि दशाङ्गुलं हृदयं तत्राधितिष्ठतीति।

दशाङ्गुलम्–अङ्गुलशब्दोऽवयववाची पञ्चभूत-पञ्चतन्मात्ररूपो दशावयवयुक्तं सकलं ब्रह्माण्डमति अतिक्रम्यातिष्ठत्परमपदे स्थित इत्यर्थः। (श्रीनिम्बार्कमते)

तस्मात्सर्वेषामाचार्याणां सिद्धान्ते दशाङ्गुलशब्देन सर्वव्यापक-स्वयं भगवान् श्रीकृष्ण एव प्रतिपाद्यते।।

सर्वत्र व्यापकः कृष्णो दशाङ्गुलस्वरूपधृक्।
सर्वव्यापकरूपाय दशाङ्गुलाय ते नमः।।३७

३८। (२) **मूलम्**

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति।।

आनन्दिनी

सर्वत्र व्यापकः कृष्णो दशाङ्गुलहृदि स्तितः।
सहस्त्रशिरपादश्च श्रुतिशास्त्रप्रमाणतः।।

स पुरुषः स्वयं भगवान् श्रीकृष्णः, तस्य सर्वव्यापकरूपमैश्वर्यमुक्त्वा अथेदानीं कालत्रयव्यापकत्व-मैश्वर्यं कथयति–पुरुष इति।

पुरुष एवेदं सर्वम्–स पूर्वकथितः पुरुषः श्रीकृष्णः। 'एव' शब्देन पुरुषान्तरं व्यावृत्तम्। यदिदं वर्तमानं सर्वं कार्यजातं तत्सर्वं पुरुषः श्रीकृष्ण एव।

तथाहि श्रीब्रह्मा (श्रीभा. १०।१४।५६)–

वस्तुतो जानतामत्र कृष्णं स्थाष्णु चरिष्णु च।
भगवद्रूपमखिलं नान्यद्वस्त्विह किञ्चन।।

तस्मात् स्वयं भगवान् श्रीकृष्ण एव सर्वमिति। तदपादानत्वात्सर्वं तदात्मकत्वमिति। तथा त श्रीश्रुतौ "सर्वं खल्विदं ब्रह्म" (छा. ३।१४।१) "ऐतदात्म्यमिदं सर्वम्"(छा. ६।१०।३) "यतो वा इमानि भूतानि" (तै. ३।१।१) "जन्माद्यस्य यतः" (१।१।२।२) "आत्मकृतः परिणामात्" (ब्र.सू. १।४।७।२६) इति तस्यैव सर्वत्वात्तस्मात्कार्यकारणयोरनन्यत्वम्। तथा च श्रीबादरायणः–"**तदनन्यत्वमारम्भणशब्दादिभ्यः**" (२।१।५।१४)।

अथ तस्य सार्वकालिकं व्यापकत्वमाह–यदिति। यद्भूतं अतीतकालीनं वस्तुजातं सर्वं पुरष एव। अतीतकल्पजातसर्वं वस्तुजातं सर्वमेव पुरुषाज्ञातम्। यच्चभाव्यं भविष्यत्कल्पजातं वस्तु स एव। एवं अतीतानागत वर्त्तमानकालीनं पदार्थसमूहं स पुरुष एव। तथाहि श्रीभगवान् (१०।८)–

अहं सर्वस्य प्रभावो मत्तः सर्वं प्रवर्त्तते।
अहमेवासमेवाग्रे नान्यद् यत् सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्यते सोऽस्म्यहम्।। (श्रीभा. १।९।३२) इति
ज्योतिंषि शुक्राणि च यानि लोके त्रयो लोका लोकपालास्त्रयी च।
त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा देवकी पुत्र एव।।

श्रीवैष्णवे–

ज्योतिंषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य।।

श्रीमहाभारते– **य एष देवकीपुत्रः पुरस्तादवतिष्ठते।**
स एव पुरुषो भूतं भव्यं चापि तथा भवत्।।

एवमस्य पुरुषस्य सर्वदेशकालतो व्याप्तिमुक्त्वा तस्य सर्वप्रकारसृष्टिजातस्य चेतनवर्गस्य मोक्षप्रदत्वमप्याह–उतामृतस्येशान इति।

उत तथा अमृतस्य मोक्षपदस्य ईशानः प्रदाता, तथा च श्रीभागवते (३।२९।१३)-सालोक्य-सार्ष्टि-सामीप्य-सारूप्य एकत्वम्–पञ्चविधमुक्तिप्रदाता।

अन्नेन यदतिरोहति–यस्य शरीरवर्तिनो जीवजातस्य **पञ्चमोक्षप्रदाता श्रीभगवानेव**, यत् स एवं कार्यजातमन्नेन भोजनीयेन भोज्यद्रव्येण स्वकारणमतीत्य रोहति, तथा हि श्रीगीतायाम् (३।१४)-

"अन्नाद्भवन्ति भूतानि

एवं दिवारात्रान्नभोजनेन पूर्वपूर्व-बाल्य-कौमार-यौवनाद्यवस्था अतीत्य यत् जीवसमूहं रोहति वर्धते तस्य साधकजीवस्य मोक्षप्रदानेन श्रीकृष्ण ईशनः समर्थो भवति। श्रीमोक्षधर्मे-

अन्नाज्जातस्य सर्वस्य मनुष्यादेरकारणात्।
निर्वाणदायी भवति कृपया पुरुषोत्तमः।।३८ इति

३९।

मूलम्

एतावानस्य महिमा अतो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।

आनन्दिनी

नमो गोविन्ददेवाय कृष्णाय पुरुषाय च।
जगज्जन्मादिकारणस्वभक्ततारणाय हे।।

अस्य पूर्वोक्तविशेषणविशेषितस्य पूरुषस्य स्वयं भगवतः श्रीकृष्णस्य एतावान् महिमा पारमैश्वर्यम् षड्विधमहैश्वर्यं वा, स्वकीय सामर्थ्यविशेषं वा, अतः अस्मात् कारणादयं पुरुषो ज्यायान् प्रशस्यतरः परमश्रेष्ठ इति।

यत एवायं पुरुषः श्रीकृष्णश्चतुर्दशलोकान् परिव्याप्य तिष्ठति। यतश्चायमेव समस्तवस्तुजातं सृजति, यश्च संसारिणां मानवानां मोक्षमपि विदधति, अतः स पुरुषः श्रीकृष्ण एव ज्यायान् एतावान् महिमा युक्तत्वात्। एतावान् श्रीहरिनामामृतव्याकरणे (७।८९२)-

"यत्तदेतद्भ्यस्तत्परिमाणे आवतुच्।"

अतः अस्मात्कारणात्पूरुषः परमकमनीय कर-चरणादि दिव्यावयवविशिष्टपरमपूरुषः श्रीकृष्णः, स एव श्रीकृष्णो ज्यायान्। तथ च श्रीभागवते (६।३।१२)-

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम्।
यदंशतोऽस्य स्थितिजन्म नाशा नस्योतवद्यस्य वशे च लोकः।।

श्रीनारसिंहे–

ब्रह्मादिस्तम्बपर्यन्तं जगत् स्थावरजङ्गमम्।
सर्वमेवास्य महिमा स च ज्यायानतो हरिः।।

अथवा–अस्य परिदृश्यमानस्य चराचरात्मकस्य वैरिञ्च्य पञ्च प्रपञ्चस्य जगतो महिमा एतावान् एतत् परिमाणः परिच्छिन्न इत्यर्थः।

एतावानस्य कृष्णस्य महिमा जगदात्मकम्।
अनन्तमहिमानन्तु दिव्यवृन्दावने सदा।।

मूलम्

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।

आनन्दिनी

ननु पुरुषस्य कथं ज्यायस्त्वम्? तत्राह–पादोऽस्येति। अस्य पुरषस्य श्रीकृष्णस्य विश्वा भूतानि स्थावरजंगमात्मकानि ब्रह्माण्डानि पादः–अंशः, तथा हि–श्रीगोविन्दभाष्ये (२।३।१८।४३)– "**मन्त्रवर्णात्**"

"पादोऽस्य सर्वाभूतानि" (छा. ३।१२।६) अंश पादशब्दौ तु हि अर्थान्तरवाचकौ इति।

तस्मात् श्रीकृष्णस्य सृष्ट्यादि शक्तेरेकादेशः पादः। श्रीकृष्णशक्तिलोशविजृम्भितमिदं कृत्स्नं जगत्।

एवमेव श्रीगीतायां (१०।४२)–"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।"

अत्र श्रीस्वामिपादः–बहुना पृथग् ज्ञातेन किं तव कार्यं, यस्मादिदं सर्वं जगदेकांशेनैकदेशमात्रेण विष्टभ्य धृत्त्वा व्याप्येति वा अहमेवावस्थितः, न मद्व्यतिरिक्तं किञ्चिदस्ति "पादोऽस्य विश्वा भूतानि" इति श्रुतेः, इति।

तस्मात् विश्वा भूतानि विश्वानि चतुर्दशभुवनसमूहे यानि चतुर्धा स्वेदजोद्भिज्ज-जरायुजाण्डजानि तान्येकोऽशंः। एकपादः

ननु "**सत्यं ज्ञानमनन्तं ब्रह्म**" (तै.२।१।२) इति श्रुतेः, परब्रह्मणः पादादिविभागेन इयत्ताभावात्पाद-चतुष्टयं प्रतिपादनमनुचितमिति तत्राह–एवमपि जगदिदम् ब्रह्मस्ववरूपादल्पत्वात् तदुपत्पन्नत्वात् जगद्-ज्ञानार्थं पादरूपेणोपन्यासः।

"त्रिपादस्यामृतं दिवि"

त्रयः पादा यत्र तत् त्रिपादः, त्रिशब्दो बह्वर्थपरः। अस्य परमपुरुषस्य त्रिपाद्विभूतिः, त्रिपादैश्वर्यः, अंशो वा तत्तु अमृतं मरणधर्मरहितं दिवि दिव्यगोलोकधाम्नि वर्त्तते।

अत्र छन्दोगाः पठन्ति–ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच--प्राची दिक्कला दक्षिणा दिक्कला प्रतीची उदीचो दिक्कला एष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम। ब्रह्मणः सोम्य ते पादं ब्रवाणीति, ब्रवीतु मे भगवानिति तस्मै होवाच अग्निः कला सूर्य्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम। तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रःकला एष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम।

ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुःकला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः आयतनवान्नाम।

एवं ऋषभ-अग्नि-हंस-मद्गवः चतुष्पादं चतुष्कलं वा ब्रह्मणो वक्तारः श्रोता च जावालसत्यकमः (छा. ४।५-६-७।८) इति। इत्येवं ब्रह्मणः पादचतुष्टयं छन्दोगाः पठन्ति। श्रीवैकुण्ठसंहितायाम्–

अनन्तयाम विस्तारो वैकुण्ठः संप्रकीर्तितः।
तस्मादस्य त्रिपादांशो वैकुण्ठो भासते तराम्।।

श्रीलघुभागवतामृते (१।२२३)–

त्रिपाद्विभूतेर्धामत्वात् त्रिपाद्भूतं तु तत्पदम्।
विभूतिर्मायिकी सर्वा प्रोक्ता पादात्मिका यतः।।
अमृतं सुष्ठु मधुरं शाश्वतन्तु मुहुर्नवम्।
शुद्धसत्त्वन्तु तत्प्रोक्तं सत्त्वमप्राकृतन्तु यत्।
नित्याक्षरादिशब्दैस्तु षड्भावपरिवर्जितम्।।

ऐश्वर्यमेकपादन्तु ब्रह्माण्डं परिकीर्त्तितम्।
त्रिपादैश्वर्य-वैकुण्ठं नित्यधाम हरेरिति।। (३९)

४०।

मूलम् (४)

त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि।।

आनन्दिनी

त्रिपादभुवने कृष्णः प्रधानपुरुषेश्वरः।
सर्वमाक्रम्य तिष्ठति साशनानशने अपि।।

अस्मादयं पुरुषः श्रीकृष्णः त्रिपात्पुरुषः प्राकृतधर्मः स्पर्शशून्यः परब्रह्मस्वरूपः सोऽयं ऊद्ध्र्वः उदैत् स्वीय गोलोकधाम्नि देदीप्यमानस्तिष्ठति, स्वरूपशक्तिभिः परिकरगणैश्च सेव्यमान-स्तिष्ठतीत्यर्थः।

अस्य च परमपुरुषस्य श्रीकृष्णस्य पादः अंशः पादचतुष्टयस्य एकः पादः इह प्राकृतब्रह्माण्डे पुनरभवत्, इह त्रैलोक्ये बीजस्वरूपं भूतचतुष्टयेषु अभवत्। सर्वेषु प्राणीजातेषु अन्तर्यामिरूरेण स्थितमिति।

अतः स एव पुरुषो विष्वङ् भुवनकोषं ब्रह्माण्डं वा अक्रामदुत्पन्नमित्यर्थः।

श्रीभगवतो मायाद्वारेण भुवनकोषं जातमित्यर्थः।

तथा च श्रीभागवते (३।५।२५)-

सा वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिका।
मायानाम महाभाग ययेदं निर्ममे विभुः।।

तस्मादेव पुरुषात्साशनानशने, साशनं स्वर्गं यत्र कर्मफलस्याशनं भोगं भवति।

अनशनं मोक्षं यत्र मोक्षपदे जीवः श्रीभगवतः सेवानन्दमनुभवतीत्यर्थः।

यद्वा स्वीयमायाशक्त्या भुवनकोषं रचनानन्तरं 'तत्सृष्ट्वा तदेतवानुप्राविशत्' (तै २।६।२) इति।

तथा हि श्रीभागवते (१०।३।१४)-

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम्।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे।।

ततो रचनानन्तरं विष्वङ् सर्वत्राञ्चतीति विष्वङ्, देवतिर्यगादिरूपेण स पुरुषः श्रीकृष्णः सर्वत्र व्याप्य तिष्ठतीत्यर्थः।

तथा च श्रीप्रह्लादः (भा. ७।९।३८)-

इत्थं नृतिर्यगृषिदेव झषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान्।।

श्रीदशमे च (२।४०)-

मत्स्याश्व कच्छपनृसिंहवराहहंस-
राजन्यविप्रविवुधेषु कृतावतारः।
त्वं पासि नस्त्रिभुवनं च यथाधुनेश
भारं भुवो हर यदूत्तम वन्दनं ते।।४०

४१। मूलम् (५)

ततो विराडजायत विराजो अधिपुरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः।।

आनन्दिनी

यतश्च पञ्चभूतानि तथा दशेन्द्रियाणि च।
समुद्भवन्ति गोविन्दः स मां रक्षतु सर्वदा।।

तस्मादेव परमपुरुषात् श्रीकृष्णात् विश्वोत्पत्तिरिति प्रति पादयति-तत इति। तस्मात् परमपुरुषात् विराट् ब्रह्माण्डदेहरूपयोगिध्येविराट्पुरुषो जातः। अत्र श्रीमनुः (१।६-९)-

आसीदिदन्तमो- भूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।।
ततः स्वयम्भूभर्गवानव्यक्तो व्यञ्जयन्निदम्।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।।
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतो मयोऽचिन्त्यः स एव स्वयमुद्बभौ।।
सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्ज्जादौ तासु बीजमवासृजत्।।
तदण्डमभवद्धैमं सहस्त्रांश्रुसमप्रभवम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।। इति

विराट्-पुरुषसंस्थानन्तु श्रीभागवते (२।१।२५)-

आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः।।

इत्यारभ्य पुरुषस्य पादमूलं पातालम्। पार्ष्णिः रसातलम्। गुल्फौ महातलम्। जङ्घे तलातलम्। जानुनी सुतलम्। ऊरुद्वयं वितलमतलञ्च। जघने महीतलम्। नाभिः नभस्तलम्। वक्षः ज्योतिर्मार्गम्। ग्रीवा महर्लोकम्। वदनं जनलोकम्। ललाटं तपोलोकम्। मस्तकं सत्यलोकम्। एवं सर्वमेव स एवाभवत्। एवमेव तत्रैव (२।६।४१)-

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भुम्नः।।

ततो विराजो अधिपुरुषः, तथा च सर्व वेदादिशास्त्रवेद्यः स्वयं भगवान् स्वलीलाशक्त्या विराट्देहरूपं ब्रह्माण्डं सृष्ट्वा तस्मिन् ब्रह्माण्डेऽन्तर्यामिरूपेण प्रविश्य पुरः पुरुषनिवासयोग्यं मानवशरीर-रूपं नवद्वाररूपं पुरं निर्मितवान्। एतच्चोत्तरतापनीये स्पष्टमुक्तम् (नृसिंहता. उ. ९)-स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वात्र प्रविष्ट इव विहरति इति।

किञ्च स पुरुषोऽतिरिच्यत, अतिरिक्तोऽभवत्। अतिरिक्तः देव-दानव-मानव-स्थावर-जङ्गमादि-रूपोऽभवत्। पश्चात् देवादिशरीरनिर्माणान्तरं भूमिं प्राणिनां निवासस्थानं ससर्ज स श्रीभगवानित्यर्थः।

पुरः–रसरक्तादिसप्तभिर्धातुभिः पूर्यन्ते इति पुरं शरीरं, तत्सर्वं ससर्ज इति।

तं स्रष्टा सर्वभूतानां जीवानां देहमेव च।
इन्द्रियाणां तथा स्रष्टा सर्वकर्त्रे नमोऽस्तु ते।।४१

४२। मूलम् (६)

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।
पशूंस्ताश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।।

आनन्दिनी

तस्मात्सर्वहुतः सर्वं स्वात्मपर्यन्तं हूयते दीयते यस्मै यस्मिन् वा सः। तस्मात्यज्ञात्यज्ञ-पुरुषात्पृषदाज्यं दधिमिश्रितमाज्यं संभृतं सम्पादितम्।

तथा हि अमरः (२।७।२४)–**पृषदाज्यं स दध्याज्ये।**
सृष्टेरादौ दध्याज्यादिभोग्यद्रव्यजातं सम्पादितं प्रकटितमित्यर्थः।

एवं स एव परमपुरुषः वायव्यान् वायुदेवता येषां तान् प्रसिद्धान् पशून् उत्पादितवान्।

अन्तरिक्षदेवत्याः खलु वै पशवः इति श्रुतेः। तथा अन्तरिक्षस्य च वायुदेवत्यात्पशूनां च वायुदेवत्वमिति। के ते पशवः? तत्राह–आरण्याः, अरण्ये भवाः हरिणादयः। ये च ग्राम्याः ग्रामे भवाः गवाश्वादयः।

एवं सर्वहुतो यज्ञपुरुषात्सर्वोत्पन्नत्वेन पुरुषोपासकयोगिजनाः सर्वान्पशून्सर्वाणि च भूतजातानि ज्ञानचक्षुषा करतलामलकवत्पश्यन्ति। श्रीमद्भागवते श्रीब्रह्मा (२।६।२७)–

पुरुषावयवैरेते सम्भाराः सम्भृता मया।
इति संभृतसम्भारः पुरुषावयवैरहम्।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम्।।

एवमेतेषां मन्त्राणां मनुरूपमेव श्रीभागवते (२।६।१५-३१)–

सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति।।
स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ।
एवं विराजं प्रतपंस्तर्पयन्तर्बहिः पुमान्।।
सोऽमृतस्यामयस्येशो मर्त्यमन्नं यदत्यगात्।
महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः।।
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु।।
पादास्त्रयो बहिश्चासन्नप्रजानां च आश्रमाः।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः।।

सृती विचक्रमे विष्वङ् साशनानशने उभे।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः।।
यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः।
तद्‌द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्।।

एवमृचां व्याख्या श्रीभागवते।

सर्वन्तु भगवान् कृष्णो भूतं भव्यं भवञ्च यत्।
मन्त्रा द्रव्याणि यागश्च समिद्दर्भ-हुताशनः।।४२

४३।

मूलम् (७)

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।

आनन्दिनी

तस्माद्यज्ञपुरुषात् श्रीकृष्णात्, श्रीकृष्णस्य यागादि सर्वरूपत्वं श्रीभागवते (४।७।४५)–

त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं
त्वं हि मन्त्रं समिद्दर्भपात्राणि च।
त्वं सदस्यर्त्तिजो दम्पती देवता
अग्निहोत्रं स्वधा सोम आज्यं पशुः।।

तस्मादेव सर्वोत्पादकात्पुरुषात् ऋचः सामानि जज्ञिरे, ऋग्वेदसंहिता, सामवेदः गायत्र्यादिछन्दांसि यजुंसि च जज्ञिरे।

एवमेव श्रुतिः (बृ. २।४।१०)–'अरे अस्य महतो भूतस्य निश्वासितमेतद् यदृग्वेदे। यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहास पुराणं विद्या उपनिषदः श्लोकाः' इति।

तस्मात् ऋग्यजुः सामभिः छन्दोभिश्च विना यज्ञा न सिद्धिर्भवन्ति। एतेषां ऋगादीनां ज्ञानेन परब्रह्मज्ञानं शब्दब्रह्मज्ञानं च भवतीति।

विषयेऽस्मिन् विशेषजिज्ञासायां–श्रीतत्त्वसन्दर्भानुव्याख्या श्रीसर्वसंवादिन्यां सप्तदशानुच्छेदतः विंशत्यनुच्छेदपर्यन्तं (१७-२० अनु.) तथा ब्रह्मसूत्रस्य "देवताधिकरणम्" (ब्र. सू. १।३।७।२६-३०) द्रष्टव्यम्। तत्र श्रीगोविन्दभाष्यं तथा श्रीरसिकानन्दभाष्यमपि विलोकितव्यम्। इति।

नमस्ते वेदरूपाय छन्दरूपाय ते नमः।
सर्वयज्ञस्वरूपाय श्रीकृष्णाय नमाम्यहम्।।५३

४४। मूलम् (८)

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तज्जाता अजावयः।।

आनन्दिनी

तस्मात्पुरुषात् श्रीकृष्णात्सर्वे पशवो जाता इति प्रतिपादयन्ति–तस्मादिति। तस्मादश्वाः घोटक-जातीयाः पशव उत्पन्नाः। तथा ये के च अश्वातिरिक्ता गर्दभादयो अश्वतराश्च उभयादतः मुखस्य उभयोर्भागयोरूद्ध्वोंधभागयोर्दन्ता येषां ते उभयदतः। उभयादतः दीर्घत्वं छान्दसम्। एवं ऊद्ध्वों-भागयोर्दन्तयुक्ताः सन्ति, ते यजायन्त।

एवं ह प्रसिद्धे तस्माद्यज्ञपुरुषात्प्रसिद्धाः पशुविशे षा गावो यज्ञक्रियासम्पादनार्थं गावः च जज्ञिरे।

अपरञ्च तस्मादेव परमपुरुषात् अजावयः अजाः छागाः अविः–मेषः, अवयः शैलमेषा वा इत्यमरः जाताः। न हि पशुभिर्विना यज्ञः सिध्येत्।

तथा च श्रीभागवते (२।१।३५)-

"**अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे**" इति।

"न च यज्ञे पशवो वध्या भवेयुः" इति वाच्यमालम्भनमात्रत्वात्। तथा च श्रीभागवते (११।५।१३)-

यद्घ्राणभक्षो विहितः सुराया-
स्तथा पशोरालभनं न हिंसा।

तस्माद् यागादौ न पशूनां हिंसा।। इति

अजावयः–अजाश्च विश्च अजावयः, विशशब्दस्य बहुवचनम्। तस्मादजाः दक्षिणश्च तत एव जाता इति।।४४।।

४५। मूलम् (९)

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देव अयजन्त साध्या ऋषयश्च ये।।

आनन्दिनी

गौरचन्द्रं सनातन-रूपं श्रीजीव-जीवनम्।
श्रीश्यामं बलदेवञ्च वन्दे स्वाभीष्टसिद्धये।।

अग्रतः प्रपञ्चसृष्टेः पूर्वं पुरुषं सर्वयज्ञेश्वरं जातं यज्ञस्थाने प्रकटितम्, तेन तस्मात्कारणात्तं यज्ञपुरुषं यज्ञं यज्ञसाधनयोग्याः प्रजापतयः। ऋषयः ये च ऋषयः मन्त्रद्रष्टारः।

तथा च सर्वादौ देवा इन्द्रादयः साध्याः प्रजापतयः मन्त्रद्रष्टार ऋषयश्च तं प्रपञ्चसृष्टेर्मानवदेहसृष्टेः पूर्वं यज्ञपुरुषं अयजन्त-जाययामासुः।

तथा च श्रीभागवते (३।५।४८)-

यावद्बलिं तेऽज हरामकाले यथा वयं चान्नमदाम यत्र।
यथोभयेषां त इमे हि लोका बलिं हरन्तोऽन्नमदन्त्यनूहाः।।

किञ्च (४।७।१७-१८)-

वैष्णवं यज्ञसन्तत्यै त्रिकपालं द्विजोत्तमाः।
पुरोडाशं निरवपन् वीरसंसर्गशुद्धये।।
अध्वर्युणाऽऽत्तहविषा यजमानो विशाम्पते।
धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः॥

'वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निवृत्तये' (श्रीस्वामी) पूर्वं कुण्डेष्वमूत्रयन् केचित् इत्युक्ते इति।।४५।।

४६।　**मूलम्** (१०)

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखमस्यासीत्किं बाहु किमुरू पादा उच्येते।।

आनन्दिनी

अथ देवादयो यत् यज्ञपुरुषमयजन्त तं कीदृशमित्यपेक्षायामाह-यदिति। यत् यदा मन्त्रद्रष्टार ऋषय इन्द्रादयो देवाः, दक्षादयः प्रजापतयः यज्ञपुरुषमात्मयज्ञे हविर्यज्ञे वा व्यदधुः, उपासनार्थं कल्पितवन्तः?

ते परमपुरुषं किं किं रूपेण कुत्र वा कं कल्पितवन्तः? अस्य पुरुषस्य किं मुखमासीत्, तथा किं बाहू, कौ बाहू, किं ऊरू, ऊरूद्वयं केन रूपेण कल्पितं, एवं तस्य कौ पादौ उच्येते? इति प्रश्न-प्रकारः। अथवा देवादीनां पुरुषस्य कल्पना प्रकारम्।।४६

४३।　**मूलम्** (११)

ब्राह्मणोऽस्य मूखमासीद्बाहूराजन्यः कृतः।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रौ अजायत।।

आनन्दिनी

ब्राह्मणेभ्यो नमो नित्यं वर्णानां ब्राह्मणो गुरुः।
ब्रह्मण्यदेव गोविन्दस्तस्मात्पूज्यो सदा द्विजः।।

अस्य परमपुरुषस्य ब्राह्मणत्वजातिविशिष्टो ब्राह्मणो मुखमासीत्। अस्य यज्ञपुरुषस्य मुखाद्ब्राह्मण उत्पन्नः (अस् भुवि सत्तायाम्, ह.ना.व्या. ३।३०३) तस्माद्ब्राह्मणत्वजातेस्तत्रैव सत्त्वात्।

बाहू राजन्यः कृतः, पुरुषस्य बाहू-क्षत्रियत्वजातिविशिष्टबाहुत्वेन निष्पादितः। अस्य पुरुषस्य ऊरू द्वौ ऊरू वैश्यः कृतः, वैश्यत्वजातिविशिष्ट ऊरूत्वेन निरूपितः।

एवं शूद्रत्वजातिविशिष्टः पद्भ्यामासीदिति।

एवं वर्णचतुष्टं जातिचतुष्टयं वा परमपुरुषाज्ञात इति बोध्यते।

तथा च श्रीमनुः (१।३१)-

लोकानान्तु विवृद्ध्यार्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत्।।

पुनश्च (१।९३)-

उत्तमाङ्गोद्भवाज्जैष्ठ्याद् ब्रह्मणश्चैव धारणात्।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणो गुरुः।।

ब्राह्मणः

श्रीहरिनामामृतव्याकरणे (६।३५७)-'**पृषोदादयः**' '**वाहितं पापमनेन ब्राह्मणः**'।

टीका-वाहितं पापमनेनेति ण्यन्तः वहधातोः '**टनः करणाधिकणयोः**' (५।४५८) इति टनः, बारामे ररामागमो (ब्रा) हरामे मरामागमश्च निपातफलम् (ह्म) इति ब्राह्मणः। '**ब्राह्मणा वेदतात्पर्यविदः**' श्रीस्वामिपादः (भा. ११।१६।२) इति।

तथा च-ब्राह्मणादीनामुत्पत्तिर्ब्राह्मणादिविशिष्ट एव भवति, जीवानां स्वस्वगुणकर्मानुसारेण जन्मान्तरे ब्राह्मणादिजातिविशिष्टे वंशे जन्मो भवेत्।

यदि सृष्ट्यादौ ब्राह्मणादीनां कर्मणैव ब्राह्मणत्वादि, तदा वेदः परमपुरुषात् ब्राह्मणत्वादि-धर्म-कर्मादीनामेव उत्पत्तिरभूदिति वदेत्। तदनुक्त्वा ब्राह्मणादिशब्दानां वर्ण-चतुष्टयानामुत्पत्ति-रभूदिति स्पष्टमुक्तः।

ननु 'पद्भ्याम्' इत्यपादाननिर्वचनात् पुरुषात् शूद्रस्यवोत्पत्तिः सम्भवेन्न तु वर्णेतराणामिति चेत्तत्राह-विश्वोत्पत्तिप्रकरणत्वात्।

अत्र पुरुषसूक्ते समस्तविश्वोत्पत्तिवर्णनात्। वर्णत्रयाणामागन्तुकत्वे कल्पितत्वेक वा कुत आगतः, केन वा कल्पितः? मानवानां तदाभावात्, सृष्टेरादित्वात्।

तथा च यजुः (१४।२८)-तिसृभिरस्तुवत ब्रह्मणस्पतिरधिपतिरासीत्, श्रीमहीधरार्यः -तिसृभिः प्राणोदानव्यानैरस्तौत् ब्रह्म ब्राह्मणस्पतिर्ब्राह्मणजातेः स्वाम्यभूत्। **नवदशभिरस्तुत शूद्रार्यावसृज्येताम्** अहोरात्रे अधिपत्नी आस्ताम्। (१४।३०)

श्रीमहीधराचार्यः-नवदशभिः दशहस्ताङ्गुलयः ऊर्ध्वाधः स्थछिद्ररूप-नवप्राणास्तैरस्तौत्। ततः शूद्रार्यौ शूद्रवैश्यावासृज्येतां सृष्टौ। अहोरात्रे तयोः स्वामित्वेनास्ताम् इति।

अर्यः-अर्यः स्वामिवैश्ययोः (पा. अ. सू. ३।१।१०३), अर्यः स्वामिवैश्ययोः (अ. को. ३।३।१४३) इति।

तस्मात्सर्वमिदं तस्मादेव जातमिति। अतो विराट्पुरुषादेव क्रमेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां मुखादिभ्य उत्पन्नाः। न तु तेषां गुणकर्मादयः।

यदि ब्राह्मणादयः पश्चादाविभुवन् तदा सृष्ट्यादौ मानवजातिरुत्पन्नोऽभूदिति वदेत्, स्पष्टरूपेण कीर्त्तनस्य प्रयोजनाभावात्।

अतो ब्राह्मणादिजातिः परमपुरुषादेव प्रकटोऽभूत्, तस्माद्ब्राह्मणादिवर्णचतुष्टय-जातिवाचकमेव, न तु कर्मवाचकमित्यर्थः।

अथ सृष्टिप्रकरणे स्पष्टमेवापादानं दृश्यते-'आत्मन आकाशः सम्भूतः' (तै. २।१।३), 'यतो वा इमानि भूतानि जायन्ते' (तै. ३।१।१), 'जन्माद्यस्य यतः' (ब्र. सू. १।१।२।२) इति।

किञ्च स्पष्टरूपेणापादानत्वं स्पष्टयति श्रीमनुः (१।३१)-

लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत्।।

अत्र सर्वेषां जातीनां प्रकाशविषये स्पष्टमेव प्रतिपदेन सार्द्धं पञ्चमी दृश्यते।

एवमेव श्रीमनुः (२।२६-३०-३२)-

वैदिकैः कर्मभिः पुण्यैर्निषेकादि द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।
नामधेयं दशम्यान्तु द्वादश्यां वास्य कारयेत्।
पुण्यतिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।।
शर्म्मवद्ब्राह्मणस्य स्याद् राज्ञो रक्षासमन्वितम्।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रैष्यसंयुतम्।।

आश्वलायनः-शर्म्म ब्राह्मणस्य, वर्म्म क्षत्रियस्य, गुप्तेति वैश्यस्य तस्मात् पवित्र-वैदिककर्मभि-र्ब्राह्मणादिवर्णत्रयाणां संस्कारं कर्तव्यमित्यर्थः।

अत्रेदमाकूतम्-यदि ब्राह्मणादिवणः क्रमनिष्ठो भवेत्, तदा ब्राह्मणादिवर्णनामादितः संस्कार-स्यानौचित्यम्। तथा ब्राह्मणत्वप्रकाशकः, ब्राह्मणत्वगुणयुक्तनामकरणस्य च प्रयोजनाभावत्वम्। जातकः यौवने कर्मपरत्वविचारे कस्मिन् जातौ प्रवेशं करिष्यति तस्य निश्चयाभावाच्च। आदौ यस्य संस्कारं ब्राह्मणवद्भवेत्तस्य चेत् शूद्रवदाचरणेन शूद्रत्वे पूर्वसंस्कारस्यानित्यत्वप्रसङ्गः।

अतः शरीरस्य जातिः प्रथमं ततः संस्कारः, ततः कर्मोपदेशः। ब्राह्मणादिजातीना-मुत्पत्तिमादौ वर्णयित्वा पश्चात्तेषां गुणकर्मादीनां वर्णनं कृतम्।

किञ्च यो ब्राह्मणः तपविद्याचरणादिहीनः, तथापि स एतच्छरीरधारणयावत् ब्राह्मणरूपो वर्त्तते।

तपः श्रुत च योनिश्च ह्येतद्ब्राह्मणकारणम्।
तयः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।

इति महाभाष्यम्।

तस्माद्वेदोक्तपुरुषसूक्तो प्रमाणितमिदं यत्पुरुषस्य मुखाद्ब्राह्मणः, बाह्वोः क्षत्रियः, ऊरोः वैश्यः चरणात् शूद्रः इति जात्यादीनामुत्पत्तिः श्रूयते, न तु कर्मणाम्। अत्र श्रीभागवते (७।११।१३)-

संस्कारा यत्रावच्छिन्नाः स द्विजोऽजो जगाद् यम्।
इज्याध्ययनदानानि विहितानि द्विजन्मनाम्।।
जन्मकर्मावदातानां क्रियाश्चाश्रम चोदितः।।

श्रीस्वामिपादष्टीकाः-इदानीं वर्णधर्मान् वक्तुं द्विजानां लक्षणामाह-संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः।

तर्हि शूद्रस्यापि संस्काराविच्छेदे द्विजत्वं स्यात्? तत्राह-अजो ब्रह्मा यमेवम्भूतसंस्कारयुक्तं जगाद स द्विजः, शूद्रन्तु न मन्त्रवत्संस्कारयुक्तं जगाद न चोपनयनवन्तम्, अतो नासौ द्विजः। तथा च स्मृतिः-

विवाहमात्रं सस्कारं शूद्रोऽपि लभतां सदा।
न केनचित्समसृजत् छन्दसा तं प्रजापतिः।।

श्रुतिश्च-गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यम्, जगत्या वैश्यम् न केनचित् शूद्रमिति।

अतो विवाह व्यतिरिक्तसंस्कारस्यानावश्यकत्वात् उपनयस्य तु सर्वथा निषेधात् न तस्य द्विजत्वमित्यर्थः। 'शूद्रस्य तु वर्णधर्म एव आश्रमभेदकृतविशेषाभावात्' इति। श्रीक्रमसन्दर्भे श्रीपाद-जीवः- ननु शूद्रस्यापि तेषु संस्कारेषु कृतेषु द्विजत्वं स्यात्? तत्राह-अजो यं दृष्ट्वा द्विजं जगाद, निर्दिदेश तज्जातिक एव संस्कारेषु लब्धेषु द्विजः स्यादित्यर्थः।

श्रीभागवते च (८।५।४१)- **विप्रो मुखं ब्रह्म च यस्य गुह्यं**
राजन्य आसीद् भुजयोर्बलं च।
ऊर्वोर्विडोऽङ्घ्रिरवेदशूद्रो
प्रसीदतां नः स महाविभूतिः।।
येषां पादरजः कृष्णो भगवान् द्वारकापतिः।
विभर्त्ति शिरसा नित्यं तेभ्यो नित्यं नमाम्यहम्।।

तस्माद्गर्भादानादि संस्काराभावात् शूद्रस्य न ब्राह्मणत्वमिति। (४६)

४७। मूलम् (३१, ३२)

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्रा द्वायुश्च प्राणश्च मुखादग्निरजायत।।

आनन्दिनी

सर्वेषामात्मरूपाय सर्वोत्पादकरूपिणे।
सर्वाधाराय सर्वाय सर्वरूपाय ते नमः।।

परस्मात्परमेश्वरात् दध्यादिद्रव्याणि गवादयः पशवः ऋगादेयो वेदाः ब्राह्मणादिजाविशिष्टा मानवाश्च उत्पन्नाः, तस्मादेव चन्द्रादयो देवा अपि समुत्पन्ना इति दर्शयति–चन्द्रमा इति। सर्वसृष्टिकर्तुः परेशस्य मनसः चन्द्रमा शुक्लपक्षकृष्णपक्ष तथा चन्द्रमाभिध देवताविशेषो जातः।

तथा च श्रीभागवते (३।२६।६१)–"**चन्द्रमा मनसो जातः**"।

श्रीअष्टमे (५।३४)–"**सोमं मनो यस्य समामनन्ति**" इति। अथ तस्य पुरुषस्य चक्षोः नयनात्सूर्यः संवत्सरकर्ता अजायत, तस्य मन एव चन्द्रमा, लोचने सूर्यः। श्रीभागवते (८।५।३६)–

यच्चक्षुरासीत् तरणिर्देवयानं
त्रयीमयो ब्रह्मण एव धिष्ण्यम्।

तथा तस्य श्रोत्रात् कर्णात् वायुश्च प्राणश्च अजायत। प्राण इति अमरे (१।१।६३)–

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः।
हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः।। इति

एवमस्य मुखादग्निरजायत, योऽयं सर्वदाहक अग्निः स तु मुखादजायत। श्रीभागवते (८।५।३५)–

अग्निर्मुखं यस्य तु जातवेदा
जातः क्रियाकाण्डनिमित्तजन्मा।

ऋग्वेदे (पाठान्तरम्)–"**मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत**" इति।। ४७।। ४८।

मूलम् (३१।१३)

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्ततः।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्।।

आनन्दिनी

सर्वसृष्टिकर्तुः परमपुरुषस्य "**यतो वा इमानि भूतानि जातानि**" (तै. ३।१।१) इति श्रुत्या तस्य सर्वप्रकाशकत्वमाह–नाभ्या इति। तस्मात्पुरुषात् या नाभिः सा अन्तरिक्षं नभः, नाभिप्रदेशात् अन्तरिक्षमाकाशमासीत्।

शीर्ष्णोः मस्तकप्रदेशात् द्यौः स्वर्गः समवर्त्तत समुत्पन्नः। तस्य पुरुषस्य पद्भ्यां भूमिः पृथिवी उत्पन्ना, श्रोत्रात् श्रवणप्रदेशात् दिशः पूर्वादि दशदिशः उत्पन्नाः, एवं क्रमेण तथा लोकान् अकल्पयन् कल्पितवन्तः। एवमेव श्रीभागवते (२।५।३७-४१)–

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य वाहवः।
ऊर्वो वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत।।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकस्य नाभितः।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः।।
ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात्।
मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः।।
तत्कोट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः।
जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम्।।
महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसतलम्।
पातालं पादतलत इति लोकमयः पुमान्।। इति
सर्वाधाराय पूर्णाय सर्वनामाश्रयाय च।
सर्वेश्वराय सर्वाय गोविन्दाय नमाम्यहम्।।४०

४१। **मूलम्** (३१-१४)

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्म शरद्धविः।।

आनन्दिनी

पूर्वं यत् पुरुषादज्यादिकं समुत्पन्नं ताभिरेव तं पुरुषं देवाः अजयन्तः, तं यजनप्रकारमाह –यदिति। यद् यस्मात्कारणात्पुरुषेण हविषा पुरुषरूपेण हवनद्रव्येण देवा इन्द्रादयो ब्रह्मा वा, यज्ञं पुरुषाराधनरूपं यज्ञं अतन्वतो विस्तारितवन्तः।

यज्ञे हवनप्रकारमाह–वसन्तः चैत्रवैशाखौ द्वौ मासौ वसन्तकालः, वसन्तकालमेवाज्यं घृतमासीत्। ग्रीष्मः–ग्रीष्मकाल इध्म आसीत् समिध् इत्यर्थः। शरत् शरत्कालो हविः हवनद्रव्यमासीत्।

यद्वा–सृष्टेरादौ द्रव्यादीनामसद्भावात् तद्देवा मानसयागे ऋतव एव सामग्रीं परिकल्प्य यज्ञमकृत-वन्तः। तदा वसन्ततुं घृतं प्रकल्प्य यागं चक्रुः, जीवानां वसन्तकालं घृततुल्यं परमायुवर्द्धकं देहपुष्टुकारकञ्च। ग्रीष्मकालं ज्यैष्ठाषाढमासौ समित् काष्ठस्थानीयं तस्मिन्काले मानवशरीरं शुष्केन्धनमि वनीरसं तिष्ठति। शरत्कालं हविः पुरोडाशं तदा मानवानां पाचनशक्तेर्ह्रसो भवति।

तथा ये खलु योगिनः पुरुषाराधनपरास्तेऽपिपुरुषरूपे नैवामृतस्वरूपेण दीपितेनात्मना आत्मयज्ञं समाधिरूपं यागं कृतवन्तः। अत्र मानसयागे वसन्तः सात्विकगुण उच्यते, ग्रीष्मशब्देन राजसगुण उच्यते, शरच्छब्देन तामसगुण उच्यते।

योगिन आत्मयज्ञे त्रयो हि गुणा जह्वति। श्रीगीतासु (४।२७)–

सर्वानिन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।४९

५०। **मूलम्** (३१।१५)

सप्तस्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अवध्नन्पुरुषं पशुम्।।

आनन्दिनी

अथ यागार्थं कुण्डस्य प्रयोजनत्वात् तं विना न सिध्येदित्यर्थं तदेवाह- सप्तेति। यज्ञकुण्डस्य सप्तपरिधय आसन् ते तु सप्तसमुद्राः-क्षारोद-ईक्षूद-रसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्त जलधयः (श्रीभा. ५।१।३३) इति सप्त परिधयः।

तस्माद्भारतखण्ड एव यागा भवन्तीति समुद्राणां परिधित्वम्। तथा हि श्रीभागवते (५।१७।११) -तत्रापि भारतमेव वर्षं कर्मक्षेत्रं अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति इति।

"त्रिसप्त समिधः कृताः"

त्रिसप्त त्रिगुणाः सप्त एकविंशतिसंख्यकाः समिधः कृताः द्वादश मासाः पञ्च ऋतवः, लोकत्रयं स्वर्ग-मर्त्य-रसातलम्, तथायमादित्यः इत्येकविंशति समिधः।

अथवा-गायत्र्यादीनि सप्त छन्दांसि परिधयः इत्यर्थः। एवं भारतखण्डे यज्ञवेदीं कृत्वा देवा यत् यज्ञं विस्तारितवन्तस्तत्र तमेव पुरुषं पशुं अवध्नन् बन्धनं कृतवन्तः। एवमेव श्रीभागवते द्वितीये (२।६)-

यदास्य नाभ्यान्नलिनादहमासं महात्मनः।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते।।२२
तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः।
इदं च देवयजनं कालश्चोरुगुणान्वितः।।२३
वस्तून्योषधयः स्नेहा रसलोहमृदो जलम्।
ऋचो यजुंषि सामानि चातुर्होत्रं च सत्तम।।२४
नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च।
देवतानुक्रमः कल्पः सङ्कल्पस्तन्त्रमेव च।।२५
गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम्।
पुरुषावयवैरेते सम्भाराः सम्भृता मया।।२६
इति सम्भृतसम्भाराः पुरुषावयवैरहम्।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम्।।२७
ततस्ते भ्रातर इमे प्रजानां पतयो नव।
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः।।२८

तस्मात्सृष्ट्वादौ साधारणद्रव्याणामभावात्तं यज्ञपुरुषमेव द्रव्यं विधाय ब्रह्मा यागं कृतवान्।।५०

५१। **मूलम्** (१६)

यज्ञेन यज्ञमयजन्त देवा-
स्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः।।

आनन्दिनी

नमस्ते यज्ञरूपाय यज्ञविस्तारकारिणे।
यज्ञेश्वराय कृष्णाय यज्ञफलप्रदायिने।।

देवा इन्द्रादयः, ते यज्ञेन ज्योतिष्टोमनामकेन यागेन यज्ञं यज्ञपुरुषं श्रीवासुदेवं विधिपूर्वकमयजन्त यागं कृतवन्तः, यस्मात्तानि यजनरूपाणि धर्माणि प्रथमानि, त्रेतामुख- 'त्रेतायां यजते मखैः' (श्रीभा. १२।३।५२) इति तद् यागस्य मुख्यत्वात्।

अतः परमपुरुषस्योपासनं तस्य सृष्टेन द्रव्यणैव सिध्यतीति प्रतिपादितम्। एतावता परमपुरुषात् भगवतः श्रीगोविन्ददेवात्सर्वेषां पदार्थानां सृष्टिं प्रतिपादिता।।

वेद यज्ञ हविर्मन्त्रमाज्य होमं तथा पशुः।
यस्माद्भवति देवादिस्तस्मै कृष्णाय हि नमः।।

अथ परमपुरुषोपासना फलं प्रतिपादयति-त इति। ते महिमानः महाभाग्ययुक्ताः परमभागवताः श्रीकृष्णोपासकाः, नाकं स्वर्गं स्वः देवलोके गायतीति स्वर्गः, तं स्वर्गं सचन्त सचन्ते समवयन्ति प्राप्नुवन्ति, श्रीकृष्णोपासकाः परमभागवतास्तं स्वर्गं श्रीकृष्णं प्राप्नुवन्ति।

तं कीदृशम्? तत्राह-यत्र पूर्वे पुरातनाः साध्याः श्रीकृष्णस्य नित्यपरिकराः सन्ति निवसन्ति।

'साध्यास्तं पालयन्ति हि' इति श्रीहरिवंशे।

अथवा-ये योगिनो महिमानः जन्मान्तरैर्भगवदाराधनेन निर्धुत प्राकृतसत्त्वादिगुणः परमशुद्धाः ते श्रीकृष्णाख्यं परमपुरुषं प्राप्नुवन्ति।

उव्वटार्य महीधर श्रीरूपाणां मतेन तु।
सूक्तं पौरुषमेतावद् यजुर्वेदनिरूपणात्।।

श्रीपुरुषसूक्ते षोडर्चं श्रीरूपगोस्मामिमते-

तीर्थोदपरितैः कृष्णं सिञ्चेत् षोडशसंख्यकैः।
तुलसीचन्दनयुतैः पठन् पुरुषसूक्तकम्।।

तस्मात् षोडशसंख्यकमृचं श्रीपुरुषसूक्तमन्त्रमिति। (श्रीकृष्णं जन्मतिथिविधिः ३६)।।५१।।

ऋग्वेदे षोडशर्चं प्रथित हरिपरं पौरुषं सूक्तमेतत् सप्तर्चं साम्नि चाथर्वणवचसि यजुष्येवमष्टादशर्चम्। अर्चास्वावाहनादौ विशदमृच इमाः ऋग्विधाने नियुक्ताः आयुष्मत्पुत्रकाम्याहुति वृजिनहति ब्रह्मयज्ञादिके च। श्रीवात्स्यवीरराघवाचार्यः अत्रान्यवेदानां मन्त्राणां व्याख्यानमेवमेव इति।

।। इति श्रीपुरुषसूक्तास्यानन्दिनी टीका ।।

मूलम्

५२। (यजुः ३१।१८)

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय।।

आनन्दिनी

महान्तं पुरुषं दिव्यं कृष्णं परमपूरुषम्।
वेदाहं तमसः परं ज्ञात्वा तदेव प्राप्यते।।

अहमेतमादित्यवर्णं तमसः परस्तात् महान्तं पुरुषं वेद, अहं श्रीगोविन्ददेवस्योपासकोऽहमेतं वेदादि सच्छस्त्रप्रसिद्धमादित्यवर्णं स्वप्रकाशम् (उव्वटः)। तथा हि श्रीगीतासु (८।९)-

"**आदित्यवर्णं तमसः परस्तात्**"

अत्र श्रीशंकराचार्यः-अचिन्त्यरूपं नास्य रूपं नियत विद्यमानमपि केनचित् चिन्तयितुं शक्यते इत्यचिन्त्यरूपस्तमादित्यवर्णं तमसः परस्तात् अज्ञानलक्षणान् मोहान्धकारात् परं तम् इति।

एवमेव सर्वेषामाचार्याणां मतेन तस्य पुरुषस्य स्वप्रकाशरूपं प्रतिपादितम्।

तथा मन्त्रोऽयं श्वेताश्वतरोपनिषदि एवमेव विद्यते-तत्तु तृतीयाध्यायस्याष्टमो मन्त्रः। स्वप्रकाशस्वरूपं प्रकृतिस्पर्शरहितं, तथापि तन्नियामकं महान्तं विधिरुद्रादिसेवितपदारविन्दं पुरुषं कर-चरणादिदिव्यविग्रह-विशिष्टं श्रीकृष्णमहं वेद तत्कृपया जानामि।

तमेव विदित्वा-अद्वयज्ञानतत्त्वं स्वशक्त्यैकसेवित स्वयं भगवन्तं श्रीकृष्णमेव नत्वन्यं देवतान्तरं तत्त्वान्तरं वा विदित्वा अतिमृत्युं मृत्युमतिक्रम्य एति श्रीकृष्णलोकं गोलोकं प्राप्नोति।

मृत्युः श्रीयास्कः (११।१।९)-"मृत्युर्मारयतीति सतः, मृतं च्यावयतीति वा शतबलाक्षो मैद्गल्यः" इति।